# Maheshvara or Rudra Stotram

# महेश्वरस्तोत्रम् अथवा रुद्रस्तोत्रम्

## Document Information

Text title : Maheshvara or Rudra Stotram

File name : maheshvarastotram.itx

Category : shiva

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : Lingapurana pUrvabhagaH | adhyAyaH 18| 138||

Latest update : March 27, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 27, 2023

*sanskritdocuments.org*

# महेश्वरस्तोत्रम् अथवा रुद्रस्तोत्रम्

श्रीविष्णुरुवाच -
एकाक्षराय रुद्राय अकारायात्मरूपिणे ।
उकारायादिदेवाय विद्यादेहाय वै नमः ॥ १॥

तृतीयाय मकाराय शिवाय परमात्मने ।
सूर्याग्निसोमवर्णाय यजमानाय वै नमः ॥ २॥

अग्नये रुद्ररूपाय रुद्राणां पतये नमः ।
शिवाय शिवमन्त्राय सद्योजाताय वेधसे ॥ ३॥

वामाय वामदेवाय वरदायामृताय ते ।
अघोरायातिघोराय सद्योजाताय रंहसे ॥ ४॥

ईशानाय श्मशानाय अतिवेगाय वेगिने ।
नमोऽस्तु श्रुतिपादाय ऊर्ध्वलिङ्गाय लिङ्गिने ॥ ५॥

हेमलिङ्गाय हेमाय वारिलिङ्गाय चाम्भसे ।
शिवाय शिवलिङ्गाय व्यापिने व्योमव्यापिने ॥ ६॥

वायवे वायुवेगाय नमस्ते वायुव्यापिने ।
तेजसे तेजसाम्भर्त्रे नमस्तेजोऽधिव्यापिने ॥ ७॥

जलाय जलभूताय नमस्ते जलव्यापिने ।
पृथिव्यै चान्तरिक्षाय पृथिवीव्यापिने नमः ॥ ८॥

शब्दस्पर्शस्वरूपाय रसगन्धाय गन्धिने ।
गणाधिपतये तुभ्यं गुह्यद्गुह्यतमाय ते ॥ ९॥

अनन्ताय विरुपाय अनन्तानामयाय च ।
शाश्वताय वरिष्ठाय वारिगर्भाय योगिने ॥ १०॥

संस्थितायाम्भसां मध्ये आवयोर्मध्यवर्चसे ।

गोघ्ने हर्त्रे सदा कर्त्रे निधनायेश्वराय च ॥ ११॥

अचेतनाय चिन्त्याय चेतनायासहारिणे ।
अरूपाय सुरूपाय अनङ्गायाङ्गहारिणे ॥ १२॥

भस्मदिग्धशरीराय भानुसोमाग्निहेतवे ।
श्वेताय श्वेतवर्णाय तुहिनाद्रिचराय च ॥ १३॥

सुश्वेताय सुवक्त्राय नमः श्वेतशिखाय च ।
श्वेतास्याय महास्याय नमस्ते श्वेतलोहित ॥ १४॥

सुताराय विशिष्टाय नमो दुन्दुभिने हर ।
शतरूप विरूपाय नमः केतुमते सदा ॥ १५॥

ऋद्धिशोकविशोकाय पिनाकाय कपर्दिने ।
विपाशाय सुपाशाय नमस्ते पाशनाशिने ॥ १६॥

सुहोत्राय हविष्याय सुब्रह्मण्याय सूरिणे ।
सुमुखाय सुवक्त्राय दुर्दमाय दमाय च ॥ १७॥

कङ्काय कङ्करूपाय कङ्कणीकृतपन्नग ।
सनकाय नमस्तुभ्यं सनातन सनन्दन ॥ १८॥

सनत्कुमार सारङ्गमारणाय महात्मने ।
लोकाक्षिणे त्रिधामाय नमो विरजसे सदा ॥ १९॥

शङ्खपालाय शङ्खाय रजसे तमसे नमः ।
सारस्वताय मेघाय मेघवाहन ते नमः ॥ २०॥

सुवाहाय विवाहाय विवादवरदाय च ।
नमः शिवाय रुद्राय प्रधानाय नमोनमः ॥ २१॥

त्रिगुणाय नमस्तुभ्यं चतुर्व्यूहात्मने नमः ।
संसाराय नमस्तुभ्यं नमः संसारहेतवे ॥ २२॥

मोक्षाय मोक्षरूपाय मोक्षकर्त्रे नमोनमः ।
आत्मने ऋषये तुभ्यं स्वामिने विष्णवे नमः ॥ २३॥

नमो भगवते तुभ्यं नागानां पतये नमः ।
ओङ्काराय नमस्तुभ्यं सर्वज्ञाय नमो नमः ॥ २४॥

सर्वाय च नमस्तुभ्यं नमो नारायणाय च ।
नमो हिरण्यगर्भाय आदिदेवाय ते नमः ॥ २५॥

नमोस्त्वजाय पतये प्रजानां व्यूहहेतवे ।
महादेवाय देवानामीश्वराय नमो नमः ॥ २६॥

शर्वाय च नमस्तुभ्यं सत्याय शमनाय च ।
ब्रह्मणे चैव भूतानां सर्वज्ञाय नमो नमः ॥ २७॥

महात्मने नमस्तुभ्यं प्रज्ञारूपाय वै नमः ।
चितये चितिरूपाय स्मृतिरूपाय वै नमः ॥ २८॥

ज्ञानाय ज्ञानगम्याय नमस्ते संविदे सदा ।
शिखराय नमस्तुभ्यं नीलकण्ठाय वै नमः ॥ २९॥

अर्धनारीशरीराय अव्यक्ताय नमो नमः ।
एकादशविभेदाय स्थाणवे ते नमः सदा ॥ ३०॥

नमः सोमाय सूर्याय भवाय भवहारिणे ।
यशस्कराय देवाय शङ्करायेश्वराय च ॥ ३१॥

नमोऽम्बिकाधिपतये उमायाः पतये नमः ।
हिरण्यबाहवे तुभ्यं नमस्ते हेमरेतसे ॥ ३२॥

नीलकेशाय वित्ताय शितिकण्ठाय वै नमः ।
कपर्दिने नमस्तुभ्यं नागाङ्गाभरणाय च ॥ ३३॥

वृषारूढाय सर्वस्य हर्त्रे कर्त्रे नमो नमः ।
वीररामातिरामाय रामनाथाय ते विभो ॥ ३४॥

नमो राजाधिराजाय राज्ञामधिगताय ते ।
नमः पालाधिपतये पालाशाकृन्तते नमः ॥ ३५॥

नमः केयूरभूषाय गोपते ते नमो नमः ।
नमः श्रीकण्ठनाथाय नमो लिकुचपाणये ॥ ३६॥

भुवनेशाय देवाय वेदशास्त्र नमोऽस्तु ते ।
सारङ्गाय नमस्तुभ्यं राजहंसाय ते नमः ॥ ३७॥

कनकाङ्गदहाराय नमः सर्पोपवीतिने ।
सर्पकुण्डलमालाय कटिसूत्रीकृताहिने ॥ ३८॥

वेदगर्भाय गर्भाय विश्वगर्भाय ते शिव । (३९)

इति श्रीलिङ्गमहापुराणे पूर्वभागे अष्टादशाध्यायान्तर्गतं
श्रीविष्णुकृतं महेश्वरस्तोत्रं अथवा रुद्रस्तोत्रं सम्पूर्णम् ।

॥ लिङ्गपुराणं ॥ पूर्वभागः । अध्यायः १८। १-३८॥

Encoded and proofread by Ruma Dewan

---

*Maheshvara or Rudra Stotram*

pdf was typeset on March 27, 2023

Please send corrections to *sanskrit@cheerful.com*